aglasem.com

FOR HARYANA CLASS 12 PREPARATION

HBSE Class 12 Sample Paper 2027 Sanskrit Marking Scheme

EXAM	YEAR	TYPE	SUBJECT
Haryana Class 12	2027	Answer Key	Sanskrit

आदर्श प्रश्नपत्रम् (2026-27)

अङ्कयोजना उत्तरसङ्केताश्च

कक्षा – द्वादशी **विषय : संस्कृतम्**

समयः - होरात्रयम् **सम्पूर्णाङ्काः - 80**

SET : ...

अवधातव्यम् –

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निर्देशात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्तव्यः। यथा पठितगद्यांशे त्रयाणां प्रश्नानाम् उत्तरलेखनम् अभीष्टं परं छात्रः यदि चतुर्णाम् प्रश्नानाम् उत्तराणि लिखति तर्हि तत्र केवलं प्रथमत्रयाणां प्रश्नानां न अपितु यानि उत्तराणि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः ।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।

	खण्डः 'क' अपठितावबोधनम्	**10 अङ्काः**
1.	**अपठितगद्यांशाधारित-उत्तराणि :-**	
	(अ) एकपदेन उत्तरत - **(केवलं प्रश्नद्वयम्)** (क) इक्ष्वाकुवंशस्य (ख) सत्यपालनम् (ग) श्मशाने	2×1=2
	(ब) पूर्णवाक्येन उत्तरत - **(केवलं प्रश्नद्वयम्)** (क) भारतीयपरम्परायां हरिश्चन्द्रस्य नाम आदरेण स्मर्यते। (ख) हरिश्चन्द्रः राज्यस्य परित्यागं कृत्वा अपि स्वप्रतिज्ञां रक्षितवान्। (ग) देवाः हरिश्चन्द्रस्य सत्यनिष्ठया प्रसन्नाः अभवन्।	2×2=4
	(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । सत्यवादी हरिश्चन्द्रः / सत्यस्य महत्त्वम् छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।	1

	(द) यथानिर्देशम् उत्तरत- **(केवलं प्रश्नत्रयम्)** **उत्तराणि :-** i. (ग) लङ्-लकारः ii. (ख) प्रतापी iii. (ख) प्रतिकूलः iv. (घ) रक्षितवान्	3×1=3
	खण्डः 'ख' रचनात्मक-कार्यम्	**17 अङ्काः**
2.	**निबन्ध-लेखनम् :-** छात्रैः प्रदत्तेषु विषयेषु एकं विषयमधिकृत्य पञ्चवाक्यानि संस्कृतभाषया लेखनेन पूर्णाः अङ्काः प्रदेयाः। व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः।	5
	(छन्द-अलङ्कार-परिचयः)	
3.	**छन्दस्सु आधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नत्रयम्)** (क) मालिनीछन्दसः लक्षणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ। (ख) वंशस्थछन्दसः कस्यापि उदाहरणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ। (ग) शिखरिणीछन्दसि सप्तदश वर्णाः भवन्ति। इति लेखने द्वौ अङ्कौ प्रदेयौ। (घ) उक्ता **वसन्ततिलका** तभजाजगौगः। (लक्षणस्य रिक्तस्थानपूर्तिः)	3×2=6
4.	**अलङ्कारेषु आधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नत्रयम्)** (क) अतिशयोक्तेः अलङ्कारस्य लक्षणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ। (ख) श्लेषस्य अलङ्कारस्य कस्यापि उदाहरणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ। (ग) उत्प्रेक्षायाः अलङ्कारस्य लक्षणस्य लेखनेन द्वौ अङ्कौ प्रदेयौ। (घ) सत्यर्थे पृथगर्थायाः **स्वरव्यञ्जनसंहतेः।** क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।। (लक्षणस्य रिक्तस्थानपूर्तिः)	3×2=6
	खण्डः 'ग' पठित-अवबोधनम्	**30 अङ्काः**
5.	**पद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –** प्रस्तुतपद्यांशः पाठ-1 **"विद्ययाऽमृतमश्नुते"** इति पाठाद् उद्धृतः। **अथवा** प्रस्तुतपद्यांशः पाठ-2 **"रघुकौत्ससंवादः"** इति पाठाद् उद्धृतः। कस्यापि एकस्य पद्यांशस्य हिन्दीभाषया प्रसङ्गं सरलार्थं च लेखने 1+3=4 अङ्काः प्रदेयाः।	1×4=4
6.	**गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –** प्रस्तुतगद्यांशः पाठ-7 **"विक्रमस्यौदार्यम्"** इति पाठाद् उद्धृतः।	1×4=4

	अथवा प्रस्तुतगद्यांशः पाठ-10 **"दीनबन्धुः श्रीनायारः"** इति पाठाद् उद्धृतः। कस्यापि एकस्य गद्यांशस्य हिन्दीभाषया प्रसङ्गं सरलार्थं च लेखने 1+3=4 अङ्काः प्रदेयाः।	
7.	**सूक्त्योः भावार्थलेखनम् :-** प्रदत्तसूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेखने पूर्णाः अङ्काः 2+2=4 प्रदेयाः। **अथवा** **अन्वयस्य रिक्तस्थानपूर्तिः :- (उत्तराणि)** 1) अर्घ्यपात्रेण 2) उदाराम् 3) वरतन्तुशिष्यः 4) दुर्बलाशः	2×2=4 **अथवा** 4×1=4
8.	**पठितपद्यांशाधारित-उत्तराणि :- (केवलं प्रश्नत्रयम्)** (क) सन्मित्रलक्षणं सन्तः प्रवदन्ति। (ख) सन्मित्रं गुह्यं निगूहति। (ग) "हिताय" इत्यस्मिन् पदे चतुर्थी-विभक्तिः अस्ति। (घ) अत्र 'पुण्यात्' पदस्य विपर्ययः 'पापात्' अस्ति।	3×1=3
9.	**पठितगद्यांशाधारित-उत्तराणि :- (केवलं प्रश्नत्रयम्)** (क) अयं संसारः असारः । (ख) दानभोगैर्विना उपार्जितानां वित्तं सफलं न भवति। (ग) 'भविष्यतीति' इत्यस्मिन् पदे दीर्घसन्धिः। (घ) 'भवति' इत्यस्मिन् पदे लट् लकारः।	3×1=3
10.	**रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)** **उत्तराणि :-** (क) किमर्थम् (ख) केषाम् (ग) कस्य (घ) कीदृशः (ङ) कः	4×1=4

	(संस्कृत-साहित्य-परिचयः)	
11.	**संस्कृतसाहित्याधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नचतुष्टयम्)** (क) ईशावास्योपनिषद् ग्रन्थाद् (ख) श्रीमद्भगवद्गीता-ग्रन्थात् / श्रीमद्भगवद्गीतातः (ग) करुणरसस्य (घ) नवदश सर्गाः (ङ) राजकुमारचन्द्रापीडः	4×1=4
12.	**संस्कृतसाहित्याधारितानां प्रश्नानाम् उत्तराणि :- (केवलं प्रश्नचतुष्टयम्)** (क) अभिज्ञानशाकुन्तलम् (ख) बाणभट्टः (ग) श्रीचन्द्रशेखरवर्मा (घ) महाकविः दण्डी (ङ) महाकविः हर्षः	4×1=4
	खण्डः 'घ' अनुप्रयुक्त-व्याकरणम्	**06 अङ्काः**
13.	विसर्गसन्धेः अथवा गुणसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखने 1+1=2 अङ्कौ प्रदेयौ।	1×2=2
14.	तत्पुरुषसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखने 1+1=2 अङ्कौ प्रदेयौ।	1×2=2
15.	कर्मकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखने 1+1=2 अङ्कौ प्रदेयौ।	1×2=2
	खण्डः – 'ङ' पाठाधारिताः बहुविकल्पीयाः प्रश्नाः	**17 अङ्काः**

14.	**प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत –** **उत्तराणि :-** 1) ग) तान् + ते 2) ग) विसर्गसन्धिः 3) क) तत् + एहि 4) ख) ल्यप् 5) घ) शानच् 6) ख) त्यक्त्वा 7) घ) षष्ठीतत्पुरुषः 8) क) पुष्पाणाम् अञ्जलिम् 9) क) वाग्भूषणम् 10) घ) षष्ठी 11) ग) लोट् लकारः 12) घ) कोविदः 13) क) समाप्य 14) ख) जीवनम् 15) घ) कोषजातम् 16) क) संतुलितः 17) ख) तस्य + एव	17×1=17